# ॥ શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રમ્ ॥

.. Shri Lakshmi Sahasranamastotram
from Skandapurana ..

sanskritdocuments.org

August 20, 2017

# .. Shri Lakshmi Sahasranamastotram from Skandapurana ..

## ॥ શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રમ્ ॥

## Sanskrit Document Information

Text title : Lakshmisahasranamastotram from Skandapurana

File name : lakShmIsahasranAmastotraskanda.itx

Category : sahasranAma, devii, lakShmI

Location : doc_devii

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : DPD

Proofread by : DPD

Description/comments : Stotraratnakara II, 1929 Madras, Vishnustutimanjari 1

Source : shrIskandapurANe sanatkumArasaMhitAyAM

Latest update : February 27, 2015, October 29, 2016

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

August 20, 2017

*sanskritdocuments.org*

# ॥ શ્રીલક્ષ્મીસહસ્રનામસ્તોત્રમ્ ॥

શ્રીસ્કન્દપુરાણે સનત્કુમારસંહિતાયામ્ ।

શ્રીગણેશાય નમઃ ।

હરિઃ ૐ ।
નામ્નાં સાષ્ટસહસ્રઞ્ચ બ્રૂહિ ગાર્ગ્ય મહામતે ।
મહાલક્ષ્મ્યા મહાદેવ્યા ભુક્તિમુક્ત્યર્થસિદ્ધયે ॥ ૧॥

ગાર્ગ્ય ઉવાચ-
સનત્કુમારમાસીનં દ્વાદશાદિત્યસન્નિભમ્ ।
અપૃચ્છન્યોગિનો ભક્ત્યા યોગિનામર્થસિદ્ધયે ॥ ૨॥

સર્વલૌકિકકર્મભ્યો વિમુક્તાનાં હિતાય વૈ ।
ભુક્તિમુક્તિપ્રદં જપ્યમનુબ્રૂહી દયાનિધે ॥ ૩॥

સનત્કુમાર ભગવન્સર્વજ્ઞોઽસિ વિશેષતઃ ।
આસ્તિક્યસિદ્ધયે નૃણાં ક્ષિપ્રધર્માર્થસાધનમ્ ॥ ૪॥

ખિદ્યન્તિ માનવાસ્સર્વે ધનાભાવેન કેવલમ્ ।
સિદ્ધ્યન્તિ ધનિનોઽન્યસ્ય નૈવ ધર્માર્થકામનાઃ ॥ ૫॥

દારિદ્ર્યધ્વંસિની નામ કેન વિદ્યા પ્રકીર્તિતા ।
કેન વા બ્રહ્મવિદ્યાઽપિ કેન મૃત્યુવિનાશિની ॥ ૬॥

સર્વાસાં સારભૂતૈકા વિદ્યાનાં કેન કીર્તિતા ।
પ્રત્યક્ષસિદ્ધિદા બ્રહ્મન્ તામાચક્ષ્વ દયાનિધે ॥ ૭॥

સનત્કુમાર ઉવાચ-
સાધુ પૃષ્ટં મહાભાગાસ્સર્વલોકહિતૈષિણઃ ।
મહતામેષ ધર્મશ્ચ નાન્યેષામિતિ મે મતિઃ ॥ ૮॥

બ્રહ્મવિષ્ણુમહાદેવમહેન્દ્રાદિમહાત્મભિઃ ।
સમ્પ્રોક્તં કથયામ્યદ્ય લક્ષ્મીનામસહસ્રકમ્ ॥ ૯॥

યસ્યોચ્ચારણમાત્રેણ દારિદ્ર્યાન્મુચ્યતે નરઃ ।
કિં પુનસ્તજ્જપાજ્જાપી સર્વેષ્ટાર્થાનવાપ્નુયાત્ ॥ ૧૦॥

અસ્ય શ્રીલક્ષ્મીદિવ્યસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
આનન્દકર્દમચિક્લીતેન્દિરાસુતાદયો મહાત્માનો મહર્ષયઃ અનુષ્ટુપ્છન્દઃ ।
વિષ્ણુમાયા શક્તિઃ મહાલક્ષ્મીઃ પરાદેવતા ।
શ્રીમહાલક્ષ્મીપ્રસાદદ્વારા સર્વેષ્ટાર્થસિદ્ધ્યર્થે જપે વિનિયોગઃ ।

શ્રીમિત્યાદિ ષડઙ્ગન્યાસઃ ।

ધ્યાનમ્-
પદ્મનાભપ્રિયાં દેવીં પદ્માક્ષીં પદ્મવાસિનીમ્ ।
પદ્મવક્ત્રાં પદ્મહસ્તાં વન્દે પદ્મામહર્નિશમ્ ॥ ૧॥

પૂર્ણેન્દુવદનાં દિવ્યરત્નાભરણભૂષિતામ્ ।
વરદાભયહસ્તાઢ્યાં ધ્યાયેચ્ચન્દ્રસહોદરીમ્ ॥ ૨॥

ઇચ્છારૂપાં ભગવતસ્સચ્ચિદાનન્દરૂપિણીમ્ ।
સર્વજ્ઞાં સર્વજનનીં વિષ્ણુવક્ષસ્સ્થલાલયામ્ ॥ ૩॥

દયાલુમનિશં ધ્યાયેત્સુખસિદ્ધિસ્વરૂપિણીમ્ ।

યથોપદેશં જપિત્વા, યથાક્રમં દેવ્યૈ સમર્પ્ય,
તતશ્શામ્ભવીમુદ્રયા લક્ષ્મીમનુસન્ધાય, નામસહસ્રં જપેત્ ।
હરિઃ ૐ ॥

નિત્યાગતાનન્તનિત્યા નન્દિની જનરઞ્જની ।
નિત્યપ્રકાશિની ચૈવ સ્વપ્રકાશસ્વરૂપિણી ॥ ૧॥

મહાલક્ષ્મીર્મહાકાલી મહાકન્યા સરસ્વતી ।
ભોગવૈભવસન્ધાત્રી ભક્તાનુગ્રહકારિણી ॥ ૨॥

ઈશાવાસ્યા મહામાયા મહાદેવી મહેશ્વરી ।
હૃલ્લેખા પરમા શક્તિર્માતૃકાબીજરૂપિણી ॥ ૩॥

નિત્યાનન્દા નિત્યબોધા નાદિની જનમોદિની ।
સત્યપ્રત્યયની ચૈવ સ્વપ્રકાશાત્મરૂપિણી ॥ ૪॥

ત્રિપુરા ભૈરવી વિદ્યા હંસા વાગીશ્વરી શિવા ।
વાગ્દેવી ચ મહારાત્રિઃ કાલરાત્રિસ્ત્રિલોચના ॥ ૫॥

ભદ્રકાલી કરાલી ચ મહાકાલી તિલોત્તમા ।

કાલી કરાલવક્ત્રાન્તા કામાક્ષી કામદા શુભા ॥ ૬॥

ચણ્ડિકા ચણ્ડરૂપેશા ચામુણ્ડા ચક્રધારિણી ।
ત્રૈલોક્યજયિની દેવી ત્રૈલોક્યવિજયોત્તમા ॥ ૭॥

સિદ્ધલક્ષ્મીઃ ક્રિયાલક્ષ્મીર્મોક્ષલક્ષ્મીઃ પ્રસાદિની ।
ઉમા ભગવતી દુર્ગા ચાન્દ્રી દાક્ષાયણી શિવા ॥ ૮॥

પ્રત્યઙ્ગિરા ધરાવેલા લોકમાતા હરિપ્રિયા ।
પાર્વતી પરમા દેવી બ્રહ્મવિદ્યાપ્રદાયિની ॥ ૯॥

અરૂપા બહુરૂપા ચ વિરૂપા વિશ્વરૂપિણી ।
પઞ્ચભૂતાત્મિકા વાણી પઞ્ચભૂતાત્મિકા પરા ॥ ૧૦॥

કાલી મા પઞ્ચિકા વાગ્મી હવિઃપ્રત્યધિદેવતા ।
દેવમાતા સુરેશાના દેવગર્ભાઽમ્બિકા ધૃતિઃ ॥ ૧૧॥

સઙ્ખ્યા જાતિઃ ક્રિયાશક્તિઃ પ્રકૃતિર્મોહિની મહી ।
યજ્ઞવિદ્યા મહાવિદ્યા ગુહ્યવિદ્યા વિભાવરી ॥ ૧૨॥ var વિભાવતી
જ્યોતિષ્મતી મહામાતા સર્વમન્ત્રફલપ્રદા ।
દારિદ્ર્યધ્વંસિની દેવી હૃદયગ્રન્થિભેદિની ॥ ૧૩॥

સહસ્રાદિત્યસઙ્કાશા ચન્દ્રિકા ચન્દ્રરૂપિણી ।
ગાયત્રી સોમસમ્ભૂતિસ્સાવિત્રી પ્રણવાત્મિકા ॥ ૧૪॥

શાઙ્કરી વૈષ્ણવી બ્રાહ્મી સર્વદેવનમસ્કૃતા ।
સેવ્યદુર્ગા કુબેરાક્ષી કરવીરનિવાસિની ॥ ૧૫॥

જયા ચ વિજયા ચૈવ જયન્તી ચાઽપરાજિતા ।
કુબ્જિકા કાલિકા શાસ્ત્રી વીણાપુસ્તકધારિણી ॥ ૧૬॥

સર્વજ્ઞશક્તિશ્શ્રીશક્તિર્બ્રહ્મવિષ્ણુશિવાત્મિકા ।
ઇડાપિઙ્ગલિકામધ્યમૃણાલીતન્તુરૂપિણી ॥ ૧૭॥

યજ્ઞેશાની પ્રથા દીક્ષા દક્ષિણા સર્વમોહિની ।
અષ્ટાઙ્ગયોગિની દેવી નિર્બીજધ્યાનગોચરા ॥ ૧૮॥

સર્વતીર્થસ્થિતા શુદ્ધા સર્વપર્વતવાસિની ।
વેદશાસ્ત્રપ્રમા દેવી ષડઙ્ગાદિપદક્રમા ॥ ૧૯॥

શિવા ધાત્રી શુભાનન્દા યજ્ઞકર્મસ્વરૂપિણી ।
વ્રતિની મેનકા દેવી બ્રહ્માણી બ્રહ્મચારિણી ॥ ૨૦॥

એકાક્ષરપરા તારા ભવબન્ધવિનાશિની ।
વિશ્વમ્ભરા ધરાધારા નિરાધારાઽધિકસ્વરા ॥ ૨૧॥

રાકા કુહૂરમાવાસ્યા પૂર્ણિમાઽનુમતિર્દ્યુતિઃ ।
સિનીવાલી શિવાઽવશ્યા વૈશ્વદેવી પિશઙ્ગિલા ॥ ૨૨॥

પિપ્પલા ચ વિશાલાક્ષી રક્ષોઘ્ની વૃષ્ટિકારિણી ।
દુષ્ટવિદ્રાવિણી દેવી સર્વોપદ્રવનાશિની ॥ ૨૩॥

શારદા શરસન્ધાના સર્વશસ્ત્રસ્વરૂપિણી ।
યુદ્ધમધ્યસ્થિતા દેવી સર્વભૂતપ્રભઞ્જની ॥ ૨૪॥

અયુદ્ધા યુદ્ધરૂપા ચ શાન્તા શાન્તિસ્વરૂપિણી ।
ગઙ્ગા સરસ્વતીવેણીયમુનાનર્મદાપગા ॥ ૨૫॥

સમુદ્રવસનાવાસા બ્રહ્માણ્ડશ્રોણિમેખલા ।
પઞ્ચવક્ત્રા દશભુજા શુદ્ધસ્ફટિકસન્નિભા ॥ ૨૬॥

રક્તા કૃષ્ણા સિતા પીતા સર્વવર્ણા નિરીશ્વરી ।
કાલિકા ચક્રિકા દેવી સત્યા તુ વટુકાસ્થિતા ॥ ૨૭॥

તરુણી વારુણી નારી જ્યેષ્ઠાદેવી સુરેશ્વરી ।
વિશ્વમ્ભરાધરા કર્ત્રી ગલાર્ગલવિભઞ્જની ॥ ૨૮॥

સન્ધ્યારાત્રિર્દિવાજ્યોત્સ્ના કલાકાષ્ઠા નિમેષિકા ।
ઉર્વી કાત્યાયની શુભ્રા સંસારાર્ણવતારિણી ॥ ૨૯॥

કપિલા કીલિકાઽશોકા મલ્લિકાનવમલ્લિકા । var કૌલિકા
દેવિકા નન્દિકા શાન્તા ભઞ્જિકા ભયભઞ્જિકા ॥ ૩૦॥

કૌશિકી વૈદિકી દેવી સૌરી રૂપાધિકાઽતિભા ।
દિગ્વસ્ત્રા નવવસ્ત્રા ચ કન્યકા કમલોદ્ભવા ॥ ૩૧॥

શ્રીસ્સૌમ્યલક્ષણાઽતીતદુર્ગા સૂત્રપ્રબોધિકા ।
શ્રદ્ધા મેધા કૃતિઃ પ્રજ્ઞા ધારણા કાન્તિરેવ ચ ॥ ૩૨॥

શ્રુતિઃ સ્મૃતિર્ધૃતિર્ધન્યા ભૂતિરિષ્ટિર્મનીષિણી ।

વિરક્તિર્વ્યાપિની માયા સર્વમાયાપ્રભઞ્જની ॥ ૩૩॥

માહેન્દ્રી મન્ત્રિણી સિંહી ચેન્દ્રજાલસ્વરૂપિણી ।
અવસ્થાત્રયનિર્મુક્તા ગુણત્રયવિવર્જિતા ॥ ૩૪॥

ઈષણાત્રયનિર્મુક્તા સર્વરોગવિવર્જિતા ।
યોગિધ્યાનાન્તગમ્યા ચ યોગધ્યાનપરાયણા ॥ ૩૫॥

ત્રયીશિખા વિશેષજ્ઞા વેદાન્તજ્ઞાનરૂપિણી ।
ભારતી કમલા ભાષા પદ્મા પદ્મવતી કૃતિઃ ॥ ૩૬॥

ગૌતમી ગોમતી ગૌરી ઈશાના હંસવાહની ।
નારાયણી પ્રભાધારા જાહ્નવી શઙ્કરાત્મજા ॥ ૩૭॥

ચિત્રઘણ્ટા સુનન્દા શ્રીર્માનવી મનુસમ્ભવા ।
સ્તમ્ભિની ક્ષોભિણી મારી ભ્રામિણી શત્રુમારિણી ॥ ૩૮॥

મોહિની દ્વેષિણી વીરા અઘોરા રુદ્રરૂપિણી ।
રુદ્રૈકાદશિની પુણ્યા કલ્યાણી લાભકારિણી ॥ ૩૯॥

દેવદુર્ગા મહાદુર્ગા સ્વપ્નદુર્ગાઽષ્ટભૈરવી ।
સૂર્યચન્દ્રાગ્નિરૂપા ચ ગ્રહનક્ષત્રરૂપિણી ॥ ૪૦॥

બિન્દુનાદકલાતીતા બિન્દુનાદકલાત્મિકા ।
દશવાયુજયાકારા કલાષોડશસંયુતા ॥ ૪૧॥

કાશ્યપી કમલાદેવી નાદચક્રનિવાસિની ।
મૃડાધારા સ્થિરા ગુહ્યા દેવિકા ચક્રરૂપિણી ॥ ૪૨॥

અવિદ્યા શાર્વરી ભુઞ્જા જમ્ભાસુરનિબર્હિણી ।
શ્રીકાયા શ્રીકલા શુભ્રા કર્મનિર્મૂલકારિણી ॥ ૪૩॥

આદિલક્ષ્મીર્ગુણાધારા પઞ્ચબ્રહ્માત્મિકા પરા ।
શ્રુતિર્બ્રહ્મમુખાવાસા સર્વસમ્પત્તિરૂપિણી ॥ ૪૪॥

મૃતસઞ્જીવિની મૈત્રી કામિની કામવર્જિતા ।
નિર્વાણમાર્ગદા દેવી હંસિની કાશિકા ક્ષમા ॥ ૪૫॥

સપર્યા ગુણિની ભિન્ના નિર્ગુણા ખણ્ડિતાશુભા ।
સ્વામિની વેદિની શક્યા શામ્બરી ચક્રધારિણી ॥ ૪૬॥

દણ્ડિની મુણ્ડિની વ્યાઘ્રી શિખિની સોમસંહતિઃ ।
ચિન્તામણિશ્ચિદાનન્દા પઞ્ચબાણાગ્રબોધિની ॥ ૪૭॥ var પઞ્ચબાણપ્રબોધિની
બાણશ્રેણિસ્સહસ્રાક્ષી સહસ્રભુજપાદુકા ।
સન્ધ્યાવલિસ્ત્રિસન્ધ્યાખ્યા બ્રહ્માણ્ડમણિભૂષણા ॥ ૪૮॥

વાસવી વારુણીસેના કુલિકા મન્ત્રરઞ્જની ।
જિતપ્રાણસ્વરૂપા ચ કાન્તા કામ્યવરપ્રદા ॥ ૪૯॥

મન્ત્રબ્રાહ્મણવિદ્યાર્થા નાદરૂપા હવિષ્મતી ।
આથર્વણી શ્રુતિશૂન્યા કલ્પનાવર્જિતા સતી ॥ ૫૦॥

સત્તાજાતિઃ પ્રમાઽમેયાઽપ્રમિતિઃ પ્રાણદા ગતિઃ ।
અવર્ણા પઞ્ચવર્ણા ચ સર્વદા ભુવનેશ્વરી ॥ ૫૧॥

ત્રૈલોક્યમોહિની વિદ્યા સર્વભર્ત્રી ક્ષરાઽક્ષરા ।
હિરણ્યવર્ણા હરિણી સર્વોપદ્રવનાશિની ॥ ૫૨॥

કૈવલ્યપદવીરેખા સૂર્યમણ્ડલસંસ્થિતા ।
સોમમણ્ડલમધ્યસ્થા વહ્નિમણ્ડલસંસ્થિતા ॥ ૫૩॥

વાયુમણ્ડલમધ્યસ્થા વ્યોમમણ્ડલસંસ્થિતા ।
ચક્રિકા ચક્રમધ્યસ્થા ચક્રમાર્ગપ્રવર્તિની ॥ ૫૪॥

કોકિલાકુલચક્રેશા પક્ષતિઃ પંક્તિપાવની ।
સર્વસિદ્ધાન્તમાર્ગસ્થા ષડ્વર્ણાવરવર્જિતા ॥ ૫૫॥

શરરુદ્રહરા હન્ત્રી સર્વસંહારકારિણી ।
પુરુષા પૌરુષી તુષ્ટિસ્સર્વતન્ત્રપ્રસૂતિકા ॥ ૫૬॥

અર્ધનારીશ્વરી દેવી સર્વવિદ્યાપ્રદાયિની ।
ભાર્ગવી યાજુષીવિદ્યા સર્વોપનિષદાસ્થિતા ॥ ૫૭॥

વ્યોમકેશાખિલપ્રાણા પઞ્ચકોશવિલક્ષણા ।
પઞ્ચકોશાત્મિકા પ્રત્યક્પઞ્ચબ્રહ્માત્મિકા શિવા ॥ ૫૮॥

જગજ્જરાજનિત્રી ચ પઞ્ચકર્મપ્રસૂતિકા ।
વાગ્દેવ્યાભરણાકારા સર્વકામ્યસ્થિતસ્થિતિઃ ॥ ૫૯॥

અષ્ટાદશચતુષ્ષષ્ટિપીઠિકા વિદ્યયા યુતા ।
કાલિકાકર્ષણશ્યામા યક્ષિણી કિન્નરેશ્વરી ॥ ૬૦॥

કેતકી મલ્લિકાશોકા વારાહી ધરણી ધ્રુવા ।
નારસિંહી મહોગ્રાસ્યા ભક્તાનામાર્તિનાશિની ॥ ૬૧॥

અન્તર્બલા સ્થિરા લક્ષ્મીર્જરામરણનાશિની ।
શ્રીરઞ્જિતા મહાકાયા સોમસૂર્યાગ્નિલોચના ॥ ૬૨॥

અદિતિર્દેવમાતા ચ અષ્ટપુત્રાઽષ્ટયોગિની ।
અષ્ટપ્રકૃતિરષ્ટાષ્ટવિભ્રાજદ્વિકૃતાકૃતિઃ ॥ ૬૩॥

દુર્ભિક્ષધ્વંસિની દેવી સીતા સત્યા ચ રુક્મિણી ।
ખ્યાતિજા ભાર્ગવી દેવી દેવયોનિસ્તપસ્વિની ॥ ૬૪॥

શાકમ્ભરી મહાશોણા ગરુડોપરિસંસ્થિતા ।
સિંહગા વ્યાઘ્રગા દેવી વાયુગા ચ મહાદ્રિગા ॥ ૬૫॥

અકારાદિક્ષકારાન્તા સર્વવિદ્યાધિદેવતા ।
મન્ત્રવ્યાખ્યાનનિપુણા જ્યોતિશ્શાસ્ત્રૈકલોચના ॥ ૬૬॥

ઇડાપિઙ્ગલિકામધ્યાસુષુમ્ના ગ્રન્થિભેદિની ।
કાલચક્રાશ્રયોપેતા કાલચક્રસ્વરૂપિણી ॥ ૬૭॥

વૈશારદી મતિશ્શ્રેષ્ઠા વરિષ્ઠા સર્વદીપિકા ।
વૈનાયકી વરારોહા શ્રોણિવેલા બહિર્વલિઃ ॥ ૬૮॥

જમ્ભિની જૃમ્ભિણી જૃમ્ભકારિણી ગણકારિકા ।
શરણી ચક્રિકાઽનન્તા સર્વવ્યાધિચિકિત્સકી ॥ ૬૯॥

દેવકી દેવસઙ્કાશા વારિધિઃ કરુણાકરા ।
શર્વરી સર્વસમ્પન્ના સર્વપાપપ્રભઞ્જિની ॥ ૭૦॥

એકમાત્રા દ્વિમાત્રા ચ ત્રિમાત્રા ચ તથાપરા ।
અર્ધમાત્રા પરા સૂક્ષ્મા સૂક્ષ્માર્થાઽર્થપરાઽપરા ॥ ૭૧॥

એકવીરા વિશેષાખ્યા ષષ્ઠીદેવી મનસ્વિની ।
નૈષ્કર્મ્યા નિષ્કલાલોકા જ્ઞાનકર્માધિકા ગુણા ॥ ૭૨॥

સબન્ધ્વાનન્દસન્દોહા વ્યોમાકારાઽનિરૂપિતા ।

ગદ્યપદ્યાત્મિકા વાણી સર્વાલઙ્કારસંયુતા ॥ ૭૩॥

સાધુબન્ધપદન્યાસા સર્વૌકો ઘટિકાવલિઃ ।
ષટ્કર્મા કર્કશાકારા સર્વકર્મવિવર્જિતા ॥ ૭૪॥

આદિત્યવર્ણા ચાપર્ણા કામિની વરરૂપિણી ।
બ્રહ્માણી બ્રહ્મસન્તાના વેદવાગીશ્વરી શિવા ॥ ૭૫॥

પુરાણન્યાયમીમાંસાધર્મશાસ્ત્રાગમશ્રુતા ।
સદ્યોવેદવતી સર્વા હંસી વિદ્યાધિદેવતા ॥ ૭૬॥

વિશ્વેશ્વરી જગદ્ધાત્રી વિશ્વનિર્માણકારિણી ।
વૈદિકી વેદરૂપા ચ કાલિકા કાલરૂપિણી ॥ ૭૭॥

નારાયણી મહાદેવી સર્વતત્ત્વપ્રવર્તિની ।
હિરણ્યવર્ણરૂપા ચ હિરણ્યપદસમ્ભવા ॥ ૭૮॥

કૈવલ્યપદવી પુણ્યા કૈવલ્યજ્ઞાનલક્ષિતા ।
બ્રહ્મસમ્પત્તિરૂપા ચ બ્રહ્મસમ્પત્તિકારિણી ॥ ૭૯॥

વારુણી વારુણારાધ્યા સર્વકર્મપ્રવર્તિની ।
એકાક્ષરપરાઽઽયુક્તા સર્વદારિદ્ર્યભઞ્જિની ॥ ૮૦॥

પાશાંકુશાન્વિતા દિવ્યા વીણાવ્યાખ્યાક્ષસૂત્રભૃત્ ।
એકમૂર્તિસ્ત્રયીમૂર્તિર્મધુકૈટભભઞ્જિની ॥ ૮૧॥

સાંખ્યા સાંખ્યવતી જ્વાલા જ્વલન્તી કામરૂપિણી ।
જાગ્રન્તી સર્વસમ્પત્તિસ્સુષુમાન્વેષ્ટદાયિની ॥ ૮૨॥ var સ્વેષ્ટદાયિની
કપાલિની મહાદંષ્ટ્રા ભ્રુકુટી કુટિલાનના ।
સર્વાવાસા સુવાસા ચ બૃહત્યષ્ટિશ્ચ શક્વરી ॥ ૮૩॥

છન્દોગણપ્રતિષ્ઠા ચ કલ્માષી કરુણાત્મિકા ।
ચક્ષુષ્મતી મહાઘોષા ખડ્ગચર્મધરાઽશનિઃ ॥ ૮૪॥

શિલ્પવૈચિત્ર્યવિદ્યોતા સર્વતોભદ્રવાસિની ।
અચિન્ત્યલક્ષણાકારા સૂત્રભાષ્યનિબન્ધના ॥ ૮૫॥

સર્વવેદાર્થસમ્પત્તિસ્સર્વશાસ્ત્રાર્થમાતૃકા ।
અકારાદિક્ષકારાન્તસર્વવર્ણકૃતસ્થલા ॥ ૮૬॥

સર્વલક્ષ્મીસ્સદાનન્દા સારવિદ્યા સદાશિવા ।
સર્વજ્ઞા સર્વશક્તિશ્ચ ખેચરીરૂપગોચ્છ્રિતા ॥ ૮૭॥

અણિમાદિગુણોપેતા પરા કાષ્ઠા પરા ગતિઃ ।
હંસયુક્તવિમાનસ્થા હંસારૂઢા શશિપ્રભા ॥ ૮૮॥

ભવાની વાસનાશક્તિરાકૃતિસ્થાખિલાઽખિલા ।
તન્ત્રહેતુર્વિચિત્રાઙ્ગી વ્યોમગઙ્ગાવિનોદિની ॥ ૮૯॥

વર્ષા ચ વાર્ષિકા ચૈવ ઋગ્યજુસ્સામરૂપિણી ।
મહાનદીનદીપુણ્યાઽગણ્યપુણ્યગુણક્રિયા ॥ ૯૦॥

સમાધિગતલભ્યાર્થા શ્રોતવ્યા સ્વપ્રિયા ઘૃણા ।
નામાક્ષરપરા દેવી ઉપસર્ગનખાઞ્ચિતા ॥ ૯૧॥

નિપાતોરુદ્વયીજઙ્ઘા માતૃકા મન્ત્રરૂપિણી ।
આસીના ચ શયાના ચ તિષ્ઠન્તી ધાવનાધિકા ॥ ૯૨॥

લક્ષ્યલક્ષણયોગાઢ્યા તાદ્રૂપ્યગણનાકૃતિઃ ।
સૈકરૂપા નૈકરૂપા સેન્દુરૂપા તદાકૃતિઃ ॥ ૯૩॥

સમાસતદ્ધિતાકારા વિભક્તિવચનાત્મિકા ।
સ્વાહાકારા સ્વધાકારા શ્રીપત્યર્ધાઙ્ગનન્દિની ॥ ૯૪॥

ગમ્ભીરા ગહના ગુહ્યા યોનિલિઙ્ગાર્ધધારિણી ।
શેષવાસુકિસંસેવ્યા ચષાલા વરવર્ણિની ॥ ૯૫॥

કારુણ્યાકારસમ્પત્તિઃ કીલકૃન્મન્ત્રકીલિકા ।
શક્તિબીજાત્મિકા સર્વમન્ત્રેષ્ટાક્ષયકામના ॥ ૯૬॥

આગ્નેયી પાર્થિવા આપ્યા વાયવ્યા વ્યોમકેતના ।
સત્યજ્ઞાનાત્મિકાઽઽનન્દા બ્રાહ્મી બ્રહ્મ સનાતની ॥ ૯૭॥ var નન્દા
અવિદ્યાવાસના માયાપ્રકૃતિસ્સર્વમોહિની ।
શક્તિર્ધારણશક્તિશ્ચ ચિદચિચ્છક્તિયોગિની ॥ ૯૮॥

વક્ત્રારુણા મહામાયા મરીચિર્મદમર્દિની ।
વિરાડ્ સ્વાહા સ્વધા શુદ્ધા નીરૂપાસ્તિસ્સુભક્તિગા ॥ ૯૯॥ via વિરાટ્
નિરૂપિતાદ્વયીવિદ્યા નિત્યાનિત્યસ્વરૂપિણી ।

વૈરાજમાર્ગસઞ્ચારા સર્વસત્પથદર્શિની ॥ ૧૦૦॥

જાલન્ધરી મૃડાની ચ ભવાની ભવભઞ્જની ।
ત્રૈકાલિકજ્ઞાનતન્તુસ્ત્રિકાલજ્ઞાનદાયિની ॥ ૧૦૧॥

નાદાતીતા સ્મૃતિઃ પ્રજ્ઞા ધાત્રીરૂપા ત્રિપુષ્કરા ।
પરાજિતાવિધાનજ્ઞા વિશેષિતગુણાત્મિકા ॥ ૧૦૨॥

હિરણ્યકેશિની હેમબ્રહ્મસૂત્રવિચક્ષણા ।
અસંખ્યેયપરાર્ધાન્તસ્વરવ્યઞ્જનવૈખરી ॥ ૧૦૩॥

મધુજિહ્વા મધુમતી મધુમાસોદયા મધુઃ ।
માધવી ચ મહાભાગા મેઘગમ્ભીરનિસ્વના ॥ ૧૦૪॥

બ્રહ્મવિષ્ણુમહેશાદિજ્ઞાતવ્યાર્થવિશેષગા ।
નાભૌ વહ્નિશિખાકારા લલાટે ચન્દ્રસન્નિભા ॥ ૧૦૫॥

ભ્રૂમધ્યે ભાસ્કરાકારા સર્વતારાકૃતિર્હૃદિ ।
કૃત્તિકાદિભરણ્યન્તનક્ષત્રેષ્ટ્યાર્ચિતોદયા ॥ ૧૦૬॥

ગ્રહવિદ્યાત્મિકા જ્યોતિર્જ્યોતિર્વિન્મતિજીવિકા ।
બ્રહ્માણ્ડગર્ભિણી બાલા સપ્તાવરણદેવતા ॥ ૧૦૭॥

વૈરાજોત્તમસામ્રાજ્યા કુમારકુશલોદયા ।
બગલા ભ્રમરામ્બા ચ શિવદૂતી શિવાત્મિકા ॥ ૧૦૮॥

મેરુવિન્ધ્યાદિસંસ્થાના કાશ્મીરપુરવાસિની ।
યોગનિદ્રા મહાનિદ્રા વિનિદ્રા રાક્ષસાશ્રિતા ॥ ૧૦૯॥

સુવર્ણદા મહાગઙ્ગા પઞ્ચાખ્યા પઞ્ચસંહતિઃ ।
સુપ્રજાતા સુવીરા ચ સુપોષા સુપતિશ્શિવા ॥ ૧૧૦॥

સુગૃહા રક્તબીજાન્તા હતકન્દર્પજીવિકા ।
સમુદ્રવ્યોમમધ્યસ્થા સમબિન્દુસમાશ્રયા ॥ ૧૧૧॥

સૌભાગ્યરસજીવાતુસ્સારાસારવિવેકદૃક્ ।
ત્રિવલ્યાદિસુપુષ્ટાઙ્ગા ભારતી ભરતાશ્રિતા ॥ ૧૧૨॥

નાદબ્રહ્મમયીવિદ્યા જ્ઞાનબ્રહ્મમયીપરા ।
બ્રહ્મનાડી નિરુક્તિશ્ચ બ્રહ્મકૈવલ્યસાધનમ્ ॥ ૧૧૩॥

કાલિકેયમહોદારવીર્યવિક્રમરૂપિણી ।
વડબાગ્નિશિખાવક્ત્રા મહાકબલતર્પણા ॥ ૧૧૪॥

મહાભૂતા મહાદર્પા મહાસારા મહાક્રતુઃ ।
પઞ્જભૂતમહાગ્રાસા પઞ્ચભૂતાધિદેવતા ॥ ૧૧૫॥

સર્વપ્રમાણા સમ્પત્તિસ્સર્વરોગપ્રતિક્રિયા ।
બ્રહ્માણ્ડાન્તર્બહિર્વ્યાપ્તા વિષ્ણુવક્ષોવિભૂષણી ॥ ૧૧૬॥

શાઙ્કરી વિધિવક્ત્રસ્થા પ્રવરા વરહેતુકી ।
હેમમાલા શિખામાલા ત્રિશિખા પઞ્ચમોચના ॥ ૧૧૭॥ var  લોચના
સર્વાગમસદાચારમર્યાદા યાતુભઞ્જની । var  સદાચાર મર્યાદાયાતુ
પુણ્યશ્લોકપ્રબન્ધાઢ્યા સર્વાન્તર્યામિરૂપિણી ॥ ૧૧૮॥

સામગાનસમારાધ્યા શ્રોત્રકર્ણરસાયનમ્ ।
જીવલોકૈકજીવાતુર્ભદ્રોદારવિલોકના ॥ ૧૧૯॥

તટિત્કોટિલસત્કાન્તિસ્તરુણી હરિસુન્દરી ।
મીનનેત્રા ચ સેન્દ્રાક્ષી વિશાલાક્ષી સુમઙ્ગલા ॥ ૧૨૦॥

સર્વમઙ્ગલસમ્પન્ના સાક્ષાન્મઙ્ગલદેવતા ।
દેહહૃદ્દીપિકા દીપ્તિર્જિહ્મપાપપ્રણાશિની ॥ ૧૨૧॥

અર્ધચન્દ્રોલ્લસદ્દંષ્ટ્રા યજ્ઞવાટીવિલાસિની ।
મહાદુર્ગા મહોત્સાહા મહાદેવબલોદયા ॥ ૧૨૨॥

ડાકિનીડ્યા શાકિનીડ્યા સાકિનીડ્યા સમસ્તજુટ્ ।
નિરઙ્કુશા નાકિવન્દ્યા ષડાધારાધિદેવતા ॥ ૧૨૩॥

ભુવનજ્ઞાનિનિશ્શ્રેણી ભુવનાકારવલ્લરી ।
શાશ્વતી શાશ્વતાકારા લોકાનુગ્રહકારિણી ॥ ૧૨૪॥

સારસી માનસી હંસી હંસલોકપ્રદાયિની ।
ચિન્મુદ્રાલઙ્કૃતકરા કોટિસૂર્યસમપ્રભા ॥ ૧૨૫॥

સુખપ્રાણિશિરોરેખા સદદૃષ્ટપ્રદાયિની । var  નદ
સર્વસાઙ્કર્યદોષઘ્ની ગ્રહોપદ્રવનાશિની ॥ ૧૨૬॥

ક્ષુદ્રજન્તુભયઘ્ની ચ વિષરોગાદિભઞ્જની ।
સદાશાન્તા સદાશુદ્ધા ગૃહચ્છિદ્રનિવારિણી ॥ ૧૨૭॥

કલિદોષપ્રશમની કોલાહલપુરસ્સ્થિતા ।
ગૌરી લાક્ષણકી મુખ્યા જઘન્યાકૃતિવર્જિતા ॥ ૧૨૮॥ var લાક્ષણિકી
માયા વિદ્યા મૂલભૂતા વાસવી વિષ્ણુચેતના ।
વાદિની વસુરૂપા ચ વસુરત્નપરિચ્છદા ॥ ૧૨૯॥

છાન્દસી ચન્દ્રહૃદયા મન્ત્રસ્વચ્છન્દભૈરવી ।
વનમાલા વૈજયન્તી પઞ્ચદિવ્યાયુધાત્મિકા ॥ ૧૩૦॥

પીતામ્બરમયી ચઞ્ચત્કૌસ્તુભા હરિકામિની ।
નિત્યા તથ્યા રમા રામા રમણી મૃત્યુભઞ્જની ॥ ૧૩૧॥ var ભઞ્જિની
જ્યેષ્ઠા કાષ્ઠા ધનિષ્ઠાન્તા શરાઙ્ગી નિર્ગુણપ્રિયા ।
મૈત્રેયા મિત્રવિન્દા ચ શેષ્યશેષકલાશયા ॥ ૧૩૨॥

વારાણસીવાસરતા ચાર્યાવર્તજનસ્તુતા ।
જગદુત્પત્તિસંસ્થાનસંહારત્રયકારણમ્ ॥ ૧૩૩॥

ત્વમમ્બ વિષ્ણુસર્વસ્વં નમસ્તેઽસ્તુ મહેશ્વરિ ।
નમસ્તે સર્વલોકાનાં જનન્યૈ પુણ્યમૂર્તયે ॥ ૧૩૪॥

સિદ્ધલક્ષ્મીર્મહાકાલિ મહલક્ષ્મિ નમોઽસ્તુ તે ।
સદ્યોજાતાદિપઞ્ચાગ્નિરૂપા પઞ્ચકપઞ્ચકમ્ ॥ ૧૩૫॥

યન્ત્રલક્ષ્મીર્ભવત્યાદિરાદ્યાદ્યે તે નમો નમઃ ।
સૃષ્ટ્યાદિકારણાકારવિતતે દોષવર્જિતે ॥ ૧૩૬॥

જગલ્લક્ષ્મીર્જગન્માતર્વિષ્ણુપત્નિ નમોઽસ્તુ તે । var લક્ષ્મિ જગન્
નવકોટિમહાશક્તિસમુપાસ્યપદામ્બુજે ॥ ૧૩૭॥

કનત્સૌવર્ણરત્નાઢ્યે સર્વાભરણભૂષિતે ।
અનન્તાનિત્યમહિષીપ્રપઞ્ચેશ્વરનાયકિ ॥ ૧૩૮॥

અત્યુચ્છ્રિતપદાન્તસ્થે પરમવ્યોમનાયકિ ।
નાકપૃષ્ઠગતારાધ્યે વિષ્ણુલોકવિલાસિનિ ॥ ૧૩૯॥

વૈકુણ્ઠરાજમહિષિ શ્રીરઙ્ગનગરાશ્રિતે ।

રઙ્ગનાયકિ ભૂપુત્રિ કૃષ્ણે વરદવલ્લભે ॥ ૧૪૦॥

કોટિબ્રહ્માદિસંસેવ્યે કોટિરુદ્રાદિકીર્તિતે ।
માતુલુઙ્ગમયં ખેટં સૌવર્ણચષકં તથા ॥ ૧૪૧॥

પદ્મદ્વયં પૂર્ણકુમ્ભં કીરઞ્ચ વરદાભયે ।
પાશમઙ્કુશકં શઙ્ખં ચક્રં શૂલં કૃપાણિકામ્ ॥ ૧૪૨॥

ધનુર્બાણૌ ચાક્ષમાલાં ચિન્મુદ્રામપિ બિભ્રતી ।
અષ્ટાદશભુજે લક્ષ્મીર્મહાષ્ટાદશપીઠગે ॥ ૧૪૩॥

ભૂમિનીલાદિસંસેવ્યે સ્વામિચિત્તાનુવર્તિનિ।
પદ્મે પદ્માલયે પદ્મિ પૂર્ણકુમ્ભાભિષેચિતે ॥ ૧૪૪॥

ઇન્દિરેન્દિન્દિરાભાક્ષિ ક્ષીરસાગરકન્યકે । var ઇન્દિરેન્દીવરાભાક્ષિ
ભાર્ગવિ ત્વં સ્વતન્ત્રેચ્છા વશીકૃતજગત્પતિઃ ॥ ૧૪૫॥

મઙ્ગલં મઙ્ગલાનાં ત્વં દેવતાનાં ચ દેવતા ।
ત્વમુત્તમોત્તમાનાઞ્ચ ત્વં શ્રેયઃ પરમામૃતમ્ ॥ ૧૪૬॥

ધનધાન્યાભિવૃદ્ધિશ્ચ સાર્વભૌમસુખોચ્છ્રયા ।
આન્દોલિકાદિસૌભાગ્યં મત્તેભાદિમહોદયઃ ॥ ૧૪૭॥

પુત્રપૌત્રાભિવૃદ્ધિશ્ચ વિદ્યાભોગબલાદિકમ્ ।
આયુરારોગ્યસમ્પત્તિરષ્ટૈશ્વર્યં ત્વમેવ હિ ॥ ૧૪૮॥

પદમેવ વિભૂતિશ્ચ સૂક્ષ્માસૂક્ષ્મતરાગતિઃ । var પરમેશવિભૂતિશ્ચ
સદયાપાઙ્ગસન્દત્તબ્રહ્મેન્દ્રાદિપદસ્થિતિઃ ॥ ૧૪૯॥

અવ્યાહતમહાભાગ્યં ત્વમેવાક્ષોભ્યવિક્રમઃ ।
સમન્વયશ્ચ વેદાનામવિરોધસ્ત્વમેવ હિ ॥ ૧૫૦॥

નિઃશ્રેયસપદપ્રાપ્તિસાધનં ફલમેવ ચ ।
શ્રીમન્ત્રરાજરાજ્ઞી ચ શ્રીવિદ્યા ક્ષેમકારિણી ॥ ૧૫૧॥

શ્રીબીજજપસન્તુષ્ટા ઐં હ્રીં શ્રીં બીજપાલિકા ।
પ્રપત્તિમાર્ગસુલભા વિષ્ણુપ્રથમકિઙ્કરી ॥ ૧૫૨॥

ક્લીઙ્કારાર્થસવિત્રી ચ સૌમઙ્ગલ્યાધિદેવતા ।
શ્રીષોડશાક્ષરીવિદ્યા શ્રીયન્ત્રપુરવાસિની ॥ ૧૫૩॥

સર્વમઙ્ગલમાઙ્ગલ્યે શિવે સર્વાર્થસાધિકે ।
શરણ્યે ત્ર્યમ્બકે દેવિ નારાયણિ નમોઽસ્તુ તે ॥ ૧૫૪॥

પુનઃ પુનર્નમસ્તેઽસ્તુ સાષ્ટાઙ્ગમયુતં પુનઃ ।

સનત્કુમાર ઉવાચ-
એવં સ્તુતા મહાલક્ષ્મીર્બ્રહ્મરુદ્રાદિભિસ્સુરૈઃ ।
નમદ્ભિરાર્તૈર્દીનૈશ્ચ નિસ્સ્વત્વૈર્ભોગવર્જિતૈઃ ॥ ૧॥ var  નિસ્સત્ત્વૈ
જ્યેષ્ઠા જુષ્ટૈશ્ચ નિશ્શ્રીકૈસ્સંસારાત્સ્વપરાયણૈઃ ।
વિષ્ણુપત્ની દદૌ તેષાં દર્શનં દૃષ્ટિતર્પણમ્ ॥ ૨॥

શરત્પૂર્ણેન્દુકોટ્યાભધવલાપાઙ્ગવીક્ષણૈઃ ।
સર્વાત્સત્ત્વસમાવિષ્ટાંશ્ચક્રે હૃષ્ટા વરં દદૌ ॥ ૩॥

મહાલક્ષ્મીરુવાચ-
નામ્નાં સાષ્ટસહસ્રં મે પ્રમાદાદ્વાપિ યસ્સકૃત્ ।
કીર્તયેત્તત્કુલે સત્યં વસામ્યાચન્દ્રતારકમ્ ॥ ૪॥

કિં પુનર્નિયમાજ્જપ્તુર્મદેકશરણસ્ય ચ ।
માતૃવત્સાનુકમ્પાહં પોષકી સ્યામહર્નિશમ્ ॥ ૫॥

મન્નામ સ્તવતાં લોકે દુર્લભં નાસ્તિ ચિન્તિતમ્ । var  સ્તુવ
મત્પ્રસાદેન સર્વેઽપિ સ્વસ્વેષ્ટાર્થમવાપ્સ્યથ ॥ ૬॥

લુપ્તવૈષ્ણવધર્મસ્ય મદ્વ્રતેષ્વવકીર્ણિનઃ । var  કીર્તિનઃ
ભક્તિપ્રપત્તિહીનસ્ય વન્ધ્યો નામ્નાં જપાપિ મે ॥ ૭॥

તસ્માદવશ્યં તૈર્દોષૈર્વિહીનઃ પાપવર્જિતઃ ।
જપેત્સાષ્ટસહસ્રં મે નામ્નાં પ્રત્યહમાદરાત્ ॥ ૮॥

સાક્ષાદલક્ષ્મીપુત્રોઽપિ દુર્ભાગ્યોઽપ્યલસોઽપિ વા ।
અપ્રયત્નોઽપિ મૂઢોઽપિ વિકલઃ પતિતોઽપિ ચ ॥ ૯॥

અવશાત્પ્રાપ્નુયાદ્ભાગ્યં મત્પ્રસાદેન કેવલમ્ ।
સ્પૃહેયમચિરાદ્દેવાઃ વરદાનાય જાપિનઃ ॥ ૧૦॥

દદામિ સર્વમિષ્ટાર્થં લક્ષ્મીતિ સ્મરતાં ધ્રુવમ્ ।

સનત્કુમાર ઉવાચ-
ઇત્યુક્ત્વાઽન્તર્દધે લક્ષ્મીર્વૈષ્ણવી ભગવત્કલા ॥ ૧૧॥

ઇષ્ટાપૂર્તં ચ સુકૃતં ભાગધેયં ચ ચિન્તિતમ્ ।
સ્વં સ્વં સ્થાનં ચ ભોગં ચ વિજયં લેભિરે સુરાઃ ॥ ૧૨॥

તદેતત્ પ્રવદામ્યદ્ય લક્ષ્મીનામસહસ્રકમ્ । var  તદેતદ્વો દદામદ્ય
યોગિનઃ પઠત ક્ષિપ્રં ચિન્તિતાર્થાનવાપ્સ્યથ ॥ ૧૩॥

ગાર્ગ્ય ઉવાચ-
સનત્કુમારોયોગીન્દ્ર ઇત્યુક્ત્વા સ દયાનિધિઃ । var  સનત્કુમાર
અનુગૃહ્ય યયૌ ક્ષિપ્રં તાંશ્ચ દ્વાદશયોગિનઃ ॥ ૧૪॥

તસ્માદેતદ્રહસ્યઞ્ચ ગોપ્યં જપ્યં પ્રયત્નતઃ ।
અષ્ટમ્યાં ચ ચતુર્દશ્યાં નવમ્યાં ભૃગુવાસરે ॥ ૧૫॥

પૌર્ણમાસ્યામમાયાં ચ પર્વકાલે વિશેષતઃ ।
જપેદ્વા નિત્યકાર્યેષુ સર્વાન્કામાનવાપ્નુયાત્ ॥ ૧૬॥

॥ ઇતિ શ્રીસ્કન્દપુરાણે સનત્કુમારસંહિતાયાં
લક્ષ્મીસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

Proofread by DPD

.. Shri Lakshmi Sahasranamastotram from Skandapurana ..
Searchable pdf was typeset using XeTeXgenerateactualtext feature of XƎLaTeX 0.99996
on August 20, 2017

Please send corrections to *sanskrit@cheerful.com*